आद्रमादौ च स्वस्तिवाचनम् । स्वगृह्योक्तप्रकारेण मदेतद्विदधीत वै । मधुमासे भवेद्दुःखं माधवे रत्नसञ्चयः । मरणं भवति ज्यैष्ठे आषाढ़े बन्धुनाशनम् । समृद्धिः श्रावणे नूनं भवेद्भाद्रपदे क्षयः । प्रजानामाश्विने मासि सर्वतः शुभमेव हि । ज्ञानं स्यात् कार्त्तिके सौख्यं मार्गशीर्षे भवत्यपि । पौषे ज्ञानक्षयो माघे भवेन्मेधाविवर्द्धनम् । फाल्गुनेऽपि विहृद्धिः स्यान्मलमासं विवर्जयेत् । गुरौ रवौ दिने शुक्रे कर्त्तव्यं बुधसोमयोः । अश्विनी भरणी स्वातिविशाखाहस्तभेषु च । ज्येष्ठोत्तरत्रयेष्वेवं कुर्य्यान्मन्त्राभिषेचनम् । शुक्लपक्षे च कृष्णे वा दीक्षा सर्वसुखावहा । पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा । त्रयोदशी च दशमी प्रशस्ता सर्वकामदा । पञ्चाङ्गशुद्धदिवसे सोदये शशितारयोः । गुरुशुक्रोदये शुद्धे लग्ने द्वादशशोधिते । चन्द्रतारानुकूले च शस्यते सर्वकर्मसु । सूर्य्यग्रहणकालेन समानो नास्ति कश्चन । तत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत् । न मासतिथिवारादिशोधनं सूर्य्यपर्वणि । ददातीष्टं गृहीतं यत्तस्मिन् काले गुरोर्गृहे । सिद्धिर्भवति मन्त्रस्य विनायासेन सेव्यतः"। सत्तु मन्त्रम् । अङ्कुरारोपणमागमप्रसिद्धम् । शुद्धकालत्वं दर्शयति मधुमासे इत्यादि। पञ्चाङ्गशुद्धदिवसे तिथिवारनक्षत्रकरणयोगशुद्धदिवसे । तथाच महाकपिलपञ्चरात्रम् "एवं नक्षत्रतिथ्यादौ करणे योगवासरे । मन्त्रोपदेशो गुरुणा साधकस्य शुभावहः"। सोदये शशितारयोरिति जन्मचन्द्राद्यतारयोरानुकूल्यसहिते गुरुशुक्रोदये गुरुशुक्रानस्तसमये । एतत्तु समयशुद्धमन्त्रोपलक्षणम् । (अकालशब्दोक्ते "गुरोर्भृगोरस्तबाल्ये" इत्यादिके वचने "परीक्षारामकूपांश्च पुरश्चरणदीक्षणे" इत्यादिना अशुद्धकाले तस्यावर्ज्यत्वसक्तम्) । द्वादशशोधिते द्वादशांशशोधिते । ज्ञानमालायाम् "रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा" । तथा "तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन" । दीक्षातत्त्वे "यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः । न तिथिर्न व्रतं होमो न स्नानं न जपः क्रिया । दीक्षायाः कारणं किञ्चित् स्वेच्छयाप्ते तु सद्गुरौ" । सद्गुरौ सिद्धमन्त्रगुरौ । दीपिकायाम् "ध्रुवमृदुनक्षत्रगणे रविशुभवासरेषु सत्तिथौ सद्गुरौ दीक्षा । स्थिरलग्ने शुभचन्द्रे केन्द्रे कोणे शुभे गुरौ धर्मे" । ध्रुवाणि रोहिण्युत्तराणि रोहिणी च । मृदूनि चित्रानुराधामृगशिरोरेवत्यः । केन्द्रं लग्नचतुर्थसप्तदशकम् । कोणं नवपञ्चकम् । धर्मो नवमः । वीरतन्त्रे "रोहिणी श्रवणार्द्रा च धनिष्ठा चोत्तरात्रयम् । पुष्यः शतभिषगर्कौ च दीक्षानक्षत्रमिष्यते" । अर्कौ हस्तः । रत्नावल्याम् "योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनो धृतिः । वृद्धिर्ध्रुवः सुकर्म्मा च साध्यः शुक्लश्च हर्षणः । वरीयांश्च शिवः सिद्धो ब्रह्मा इन्द्रश्च षोड़श" । तथा । शुभानि करणानि सुदीक्षायाञ्च विशेषतः । शकुन्यादीनि विष्टिञ्च विशेषेण विवर्जयेत्" । शकुन्यादीनि शकुनिनागचतुष्पदकिन्तुघ्नानि । कृष्णेऽष्टम्यां चतुर्दश्यां पूर्वपञ्चदिने तथा" । कृष्णे कृष्णपक्षे । कालोत्तरे "भूतिकामैः सिते सदा" म०त० दीक्षायां प्रतिप्रसवः "राघवभट्टधृतसारसंग्रहे शिष्यस्त्रिजन्मदिवसे संक्रान्तौ विषुवायने । सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्वणोः । मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन् न शोधयेत्" । तन्तुपर्व परमेश्वरोपवीतदानतिथिः श्रावणी पूर्णिमा । दामनपर्व दमनभञ्जनतिथिश्चैत्रशुक्लचतुर्दशी । कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम् "यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी । करालभैरवञ्चापि यामलं वाममाश्रितम् । एवंविधानि चान्यानि मोहनार्थानि तानि तु । मया सृष्टानि चान्यानि मोहायैषां भवार्णवे" । तस्मात् सद्भिः श्रुतिस्मृतिविरुद्धे वर्त्मनि न कदाचित् पदं न्यस्तव्यम् । अर्थाद्विदुष्टमन्त्रप्रतीकारस्तु "एषु दोषेषु सर्वत्र मायां काममथापि वा । लिखा चादौ श्रियं दद्यात् तद्दूषणविमुक्तये । तारसंपुटितो वापि दुष्टमन्त्रो विशुध्यति । यस्य यत्र भवेद्भक्तिः सोऽपि मन्त्रोऽस्य सिद्ध्यति । भुवनेश्वरीपारिजातेऽपि "मायावीजसमायुक्तः क्षिप्रं सिद्धिप्रदो भवेत् । पिण्डस्तु केवलो मन्त्रो मायावीजोज्ज्वलीकृतः । मायावीजात् भवेत् प्राणो वीजञ्चैतन्यवीर्य्यवत्" । नारदीये "यदृच्छया श्रुतं मन्त्रं छद्मनापि छलेन वा । पत्रेक्षितं वा गाथाञ्च तद्भवेत् त्वनर्थकृत् । प्रविश्य विधिवद्दीक्षामभिषेकावसानिकाम्" । अधिकं तन्त्रसारोक्तं देशाद्यनुपदं वक्ष्यते

तन्त्रसारे दीक्षाशब्दस्य व्युत्पत्तिप्रदर्शनपूर्वं कलाषावश्यकता दर्शिता यथा

"दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते "दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्ष-